अधीतत्वेन सन्त्यस्य अच् वा। १वेदत्रयवेत्तरि। “नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी” मनुः ततः स्वार्थे ब्राह्म० ष्यञ्। त्रैवेद्य तदर्थे “त्रैवेद्याः शुचयोदान्ताः” गीता। त्रिगुणितो वेदः शा०त०। २वेदत्रये ३तद्विहितकर्मणि च “त्रिवेदसंयोगाच्च” कात्या० श्रौ० २५।१४।३७। “वेदत्रयविहितकर्मयोगो ब्राह्मणः”कर्कः।

**त्रिवेला** स्त्री तिस्रो वेला सीमानोऽस्याम्। त्रिवृति (तेओड़ि) राजनि०।

**त्रिशक्ति** स्त्री त्रिगुणिता शक्तिः। १कालीतारात्रिपुरारूपे तन्त्रोक्ते देवीत्रये “त्रिशक्तिविषये देवि! क्रमदीक्षा प्रकीर्तिता” तन्त्रसा० इच्छाज्ञानक्रियारूपे ऐश्वरे २शक्तित्रये प्रभावोत्साहमन्त्रजे राज्ञां ३शक्तित्रये। ब० श्री०। ४त्रिगुणात्मके प्रधाने च।[१परमेश्वरे २विजिगीषुनृपे च।

**त्रिशक्तिधृत्** पु०त्रिशक्तिं इच्छादिशक्तित्रयं धरति धृ—क्विप्।

**त्रिशङ्कु** पु० त्रयः शङ्कव इव यत्र। १मार्ज्जारे २शलभे मेदि०। ३चातकखगे शब्दच०। ४खद्योते शब्दमा०। ५सूर्य्यवंश्ये नृपभेदे। तस्य नामनिरुक्तिः हरिवं०१२अ० दर्शिता यथा

“अविद्यमाने मांसे तु वशिष्ठस्य महात्मनः। सर्वकामदुघान्दोग्ध्रीं ददर्श स नृपात्मजः। तां वै क्रोधाच्च मोहाच्च श्रमाच्चैव क्षुधार्दितः। दशधर्मगतो राजा जघान जनमेजय!। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः। त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश। तच्च मांसं स्वयञ्चैव विश्वामित्रस्य चात्मजान्। भोजयामास तच्छ्रुत्वा वशिष्ठोऽप्यस्य चुक्रुधे। क्रुद्धस्तु भगवान् वाक्यमिदमाह नृपात्मजम्। वशिष्ठ उवाच। पातयेयमहं क्रूर! तव शङ्कुमसंशयम्। यदि ते द्वाविमौ शङ्कू न स्यातां वै पुनः कृतौ। पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च। अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः। वैशम्पायन उवाच। एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महातपाः। त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः”। तस्य सशरीरस्वर्गयानकथा रामा०आ०५७स०

“सोऽभिगम्य महात्मानः सर्वानेव गुरोः सुतान्। अभिवाद्यानुपूर्व्येण ह्रिया किञ्चिदवाङ्मुखः। अब्रवीत् स महात्मानः सर्व्वानेव कृताञ्जलिः। शरणं वः प्रपन्नोऽहं शरण्यान् शरणं गतः। प्रत्याख्यातो हि भद्रं वो वशिष्ठेन महात्मना। यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ। गुरुपुत्रानहं सर्व्वान्नमस्कृत्य प्रसादये। शिरसा प्रणतो याचे ब्राह्मणान् तपसि स्थितान्। ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः। सशरीरो यथाहं वै देवलोकमवाप्नुयाम्। प्रत्याख्यातो वशिष्ठेन गतिमन्यां तपोधनाः!। गुरुपुत्रानृते सर्व्वान्नाहं पश्यामि काञ्चन। इक्ष्वाकूणां हि सर्व्वेषां पुरोधाः परमा गतिः। तस्मादनन्तरं सर्व्वे भवन्तो दैवतं मम”।

“ततस्त्रिशङ्कोर्वचनं श्रुत्वा क्रोधसमन्वितम्। ऋषिपुत्रशतं राम! राजानमिदमब्रवीत्। प्रत्याख्यातोऽसि दुर्म्मेधो! गुरुणा सत्यवादिना। तं कथं समतिक्रम्य शाखान्तरमुपेयिवान्। इक्ष्वाकूणां हि सर्व्वेषां पुरोधाः परमा गतिः। न चातिक्रमितुं शक्यं वचनं सत्यवादिनः। अशक्यमिति होवाच वशिष्ठो भगवानृषिः। तं वयं वै समाहर्तुं क्रतुं शक्ताः कथञ्च न। बालिशस्त्वं नरश्रेष्ठ! गम्यतां स्वपुरं पुनः। याजने भगवान् शक्तस्त्रैलोक्यस्यापि पार्थिव!। अवमानं कथं कर्तुं तस्य शक्ष्यामहे वयम्। तेषां तद्वचनं श्रुत्वा क्रोधपर्य्याकुलाक्षरम्। स राजा पुनरेवैतानिदं वचनमब्रवीत्। प्रत्याख्यातो भगवता गुरुपुत्रैस्तथैव हि। अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः!। ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितम्। शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि। इत्युक्त्वा ते महात्मानो विविशुः स्वं स्वमाश्रमम्। अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः। नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्द्धजः। चितामाल्याङ्गरागश्च आयसाभरणोऽभवत्। तं दृष्ट्वा मन्त्रिणः सर्व्वे त्यज्य चण्डालरूपिणम्। प्राद्रवन् सहिता राम! पौरा येऽस्यानुगामिनः। एको हि राजा काकुत्स्थ! जगाम परमात्मवान्। दह्यमानो दिवारात्रं विश्वामित्रं तपोधनम्। विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतम्। चण्डालरूपिणं राम! मुनिः कारुण्यमागतः। कारुण्यात् स महातेजा वाक्यं परमधार्म्मिकः!। इदं जगाद भद्रन्ते राजानं घोरदर्शनम्। किमागमनकार्य्यन्ते राजपुत्र! महाबल!। अयोध्याधिपते! वीर! शापाच्चण्डालतां गतः। अथ तद्वाक्यमाकर्ण्य राजा चण्डालतां गतः। अब्रवीत् प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदम्। प्रत्याख्यातोऽस्मि गुरुणा गुरुपुत्रैस्तथैव च। अनवाप्यैव तं कामं मया प्राप्तो विपर्य्ययः। सशरीरो दिवं यायामिति मे सौम्यदर्शन!। मया चेष्टं क्रतुशतं तथा तन्नाप्यते फलम्। अनृतं